Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ मृत्युमन्त्रः —

नारायण ऋषिः । उष्णिक् छन्दः । मृत्युर्देवता । ङं बीजम् । हूँ शक्तिः । जीवसंहारे० । ङां इत्यादिना करन्यासः । तेनैव षडङ्गं च ।

रक्तास्यं भीमदंष्ट्रं प्रकटितवदनं वक्रनासं कराब्जैः
शूलं पाशं कपालं फणिमुसलहलं वज्रखेटं वहन्तम् ।

भीमं कालाभ्रनीलं भ्रुकुटितनयनं सैरिभस्कन्धरूढं
नानाभूतैः करालैः परिवृतमखिलप्राणकालं भजामि ॥

ओं नमो भगवते मृत्यवे यमाय सर्वजीवहरणाय उग्राय दण्डहस्ताय [1]हैं हूँ देवदत्तं गृह्ण गृह्ण सर्वलोकभयङ्कराय नाशय नाशय हूँ हुं फट् स्वाहा ॥

य इमं कालमन्त्रस्य निशामध्येऽयुतं पुनः ।
जप्त्वा ततो जपेन्मन्त्रं सहस्रं नामपूर्वकम् ॥

तज्जपस्यावसाने तु स रिपुर्मरणं लभेत् ।

१ ङं हूँ इति ख, ग, ट पाठः ।